# 8

# अनभिहिताधिकारप्रयोजनविमर्शः

तुहिन-मण्डलः
शोधच्छात्रः, संस्कृत-दर्शन-विभागः
रामकृष्ण-मिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानम्
वेलुड-मठः, हाओडा, पश्चिमवङ्गाः
Email : tuhinmandal55@gmail.com

**प्रबन्धसारः-** अनभिहिते कर्मादौ द्वितीयादीनां विधानार्थं किञ्च अभिहिते कर्मादौ द्वितीयादीनां निषेधार्थम् अनभिहिते इत्यधिकारः आरब्धः। परन्तु क्रियते कटः इत्यादौ तिङ्प्रत्ययेन किञ्च कृतः कटः इत्यत्र क्तप्रत्ययेन कर्मणः उक्तत्वात् उक्तर्थानाम् अप्रयोगः इति न्यायेनैव द्वितीयानिषेधे सति अनभिहिते इति सूत्रं व्यर्थम् इति शङ्का जायते।एतद्विषये भाष्यकारादीनां मतं स्वीकृत्य सिद्धान्ततः अनभिहिते इति सूत्रम् स्वीकर्तव्यं न वेति विचारः विहितः अस्मिन् प्रबन्धे। किञ्च यदि सूत्रमिदं स्वीकर्तव्यं तर्हि अस्य सूत्रस्य किं प्रयोजनम् इत्यादिविषये अस्मिन् प्रबन्धे यथामति आलोचितम्।

**उपोद्घातः-** षड्विधेषु पाणिनीयसूत्रेषु "अनभिहिते" [1] इतीदम् अधिकारसूत्रम्। तेन "कर्मणि द्वितीया" [2], "स्वौजसमौट्..."[3] इत्यादिसूत्रैः सह एकवाक्यतया अनभिहिते कर्मणि द्वितीया स्यात् इति सामान्यः अर्थः भवति। यथा हरिं भजति इत्यत्र हरिशब्दस्य कर्मसंज्ञायां तस्य अनभिहितत्वात् द्वितीया सञ्जाता। अभिहिते कर्मादौ यथा द्वितीयादि न स्यात् इति अभिहितस्य व्यावृत्तिः अस्य प्रयोजनम्। तेन क्रियते कटः इत्यत्र तिङ्प्रत्ययेन कर्मणः उक्तत्वात् अत्र द्वितीया न भवति।

**पूर्वपक्षः-** ननु अत्र आक्षेपः भवति यत् सूत्रमिदं नापेक्षितम्। तत्र युक्तिद्वयं दीयते । आदौ तावत् उक्तार्थानाम् अप्रयोगः इति न्यायेनैव कार्यसिद्धिः भवति। तथाहि ईषदूनः पटुः इति विग्रहे "विभाषा सुपो बहुच् पुरस्तात्तु"[4] इति सूत्रेण बहुच्प्रत्यये कृते बहुपटुः इति रूपं भवति। अत्र बहुच्प्रत्ययेन कल्पबादिप्रत्ययस्य यः अर्थः ईषद्रूपः सः उक्तः। तस्माद् उक्तार्थानाम् अप्रयोगः इति न्यायेन पुनः कल्पबादिप्रत्ययानां प्राप्तिर्न भवति। एवमेव क्रियते कटः इत्यत्र तिङ्प्रत्ययेन, कृतः कटः इत्यत्र च क्तप्रत्ययेन कटनिष्ठं कर्मत्वम् उक्तम्। तस्माद् अत्र द्वितीयार्थस्य उक्तत्वात् पुनः द्वितीयायाः प्राप्तिर्न भवति उक्तार्थानाम् अप्रयोगः इति न्यायेन।

द्वितीया युक्तिरस्ति निरवकाशत्वात् प्रथमा इति। तथाहि कटं करोति इत्यादिस्थले द्वितीया सावकाशा। तेन कृतः कटः इत्यत्र अनभिहिते इत्यधिकाराभावे कर्मत्वात् द्वितीयायां प्राप्तायां प्रातिपदिकार्थत्वात् प्रथमायां च प्राप्तायां निरवकाशत्वात् प्रथमा स्यात्। तेन द्वितीयाव्यावृत्त्यर्थम् अनभिहिताधिकारः नापेक्षितः।

[1]अष्टाध्यायी २/३/१
[2]अष्टाध्यायी २/३/२
[3]स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाङ्ङ्योस्सुप्, अष्टाध्यायी ४/१/२
[4]अष्टाध्यायी ५/३/६८


Volume 4, Issue 1, 2025, p. 58-61, ISSN 2583-6331
©Indira Gandhi National Open University

ननु वृक्षः इत्यदिस्थले तु प्रथमा चरितार्था इति चेन्न। अत्र वृक्षः इत्युक्ते वृक्षः अस्ति इति अस्तिक्रिया प्रतीयते। एवञ्च प्रतीयमानाम् अस्तिक्रियां प्रति कर्तृत्वेन अनभिहिताधिकाराभावे "कर्तृकरणयोस्तृतीया"[5] इति तृतीयाप्रसङ्गः स्यात्।

यदि उच्यते नीलमिदं न तु रक्तम् इत्यादिविशेषणान्तरनिवृत्तितात्पर्यके वाक्ये अनावश्यकत्वात् अस्तिक्रियायाः अध्याहारः न क्रियते। तेन अत्र तृतीयाप्रसङ्गोऽपि नास्ति। तस्मात् अत्र तु प्रथमा चरितार्था। तेन कृतः कटः इत्यत्र निरवकाशत्वात् प्रथमा इति न संगच्छते। तदा उच्यते तर्हि अत्र परत्वात् प्रथमा इति स्वीकरणीयम्। अर्थात् कृतः कटः इत्यत्र प्रथमाद्वितीययोः प्राप्तयोः "कर्मणि द्वितीया"[6] इति सूत्रापेक्षया "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा"[7] इति सूत्रस्य परत्वात् अनेन प्रथमा भवति। तेन द्वितीयादिव्यावृत्तये अनभिहिताधिकारः व्यर्थः।

**सिद्धान्तपक्षः-** सिद्धान्तपक्षे उच्यते यत् मैवम्, सूत्रमिदं व्यर्थं नास्ति, संख्या विभक्त्यर्थः इति पक्षे सूत्रारम्भः। तथाहि विभक्त्यर्थविषये पक्षद्वयं विद्यते। संख्या विभक्त्यर्थः, कारकं विभक्त्यर्थः चेति। संख्या विभक्त्यर्थः इति पक्षे अनभिहिते इति सूत्रस्य प्रयोजनम् अस्ति।

**संख्या विभक्त्यर्थः-** यत्र विभक्तेः संख्यारूपः अर्थः प्रधानतया उच्यते सः पक्षः संख्या विभक्त्यर्थः पक्षः।

तथाहि "अनभिहिते"[8], "कर्मणि द्वितीया"[9], "द्व्येकयोर्द्विवचनैकवचने"[10], "स्वौजसमौट्..."[11] इति सूत्राणाम् एकवाक्यतया अन्वयः भवति। कर्मणि द्वितीया इत्यत्र कर्मणि इति सप्तम्याः अर्थः अस्ति अधिकरणम्। कस्य अधिकरणम् इति चेत् द्व्येकयोरिति सूत्रोपात्तद्वित्वैकत्वादेः। तेन कर्मादि कारकं विशेषणं भवति। एकत्वादिसंख्या विशेष्यं भवति। अतः कर्मणि यद् एकत्वम् इत्यर्थः आयाति। पुनः अनभिहिते इति कर्मणि इत्यस्य विशेषणं भवति। ततः सम्पूर्णः अर्थः भवति अनभिहिते कर्मणि यद् एकत्वं तत्र द्वितीयैकवचनम्, अनभिहिते कर्मणि यद् द्वित्वं तत्र द्वितीयाद्विवचनम्, अनभिहिते कर्मणि यद् बहुत्वं तत्र द्वितीयाबहुवचनम् इति।

अयमस्ति संख्या विभक्त्यर्थः पक्षः। अस्मिन् पक्षे अमादिविभक्तेः अर्थः भवति कर्मादिगतम् एकत्वं, द्वित्वं, बहुत्वं वा। तस्मिन्नेव अर्थे विभक्तेः विधानं भवति। यथा घटं करोति। अत्र घटशब्दस्य कर्मसंज्ञा अस्ति। स च अनभिहितः। घटनिष्ठम् एकत्वमपि अनभिहितम् अस्ति। तस्मादत्र अनभिहिते कर्मणि यदेकत्वं तस्मिन् अर्थे द्वितीयैकवचने अम्-विभक्तौ घटम् इति प्रयोगः। कृतः कटः इत्यत्र कर्मणः अभिहितत्वात् द्वितीया न भवति।

इदानीम् अनभिहिताधिकाराभावदशायां संख्या विभक्त्यर्थपक्षे सूत्रस्य अर्थः भवति कर्मणि यद् एकत्वं तत्र द्वितीयैकवचनम् इति। तेन कृतः कटः इत्यत्र क्तप्रत्ययेन यद्यपि कर्म उक्तं, तथापि तन्निष्ठम् एकत्वम् अनुक्तमेव। संख्यायाः अनुक्तत्वात् कर्मणि यद् एकत्वं तस्मिन्नर्थे अम् दुर्वारः स्यात्। अनभिहिताधिकारसत्त्वे अनभिहिते कर्मणि यद् एकत्वम् इत्यर्थे फलिते प्रकृते कर्मणः उक्तत्वात् तद्गतैकत्वे अम् वार्यते।

---

[5]अष्टाध्यायी २/३/१८
[6]अष्टाध्यायी २/३/२
[7]अष्टाध्यायी २/३/४६
[8]अष्टाध्यायी २/३/१
[9]अष्टाध्यायी २/३/२
[10]अष्टाध्यायी १/४/२२
[11]अष्टाध्यायी ४/१/२


©Indira Gandhi National Open University

**प्रथमयुक्तिखण्डनम्-** न चात्र उक्तार्थानामप्रयोगः इति न्यायस्य प्रवृत्तिः, प्रधाने एव विषये न्यायः प्रवर्तते इति नियमात्। संख्या विभक्त्यर्थपक्षे कर्मगतम् एकत्वं प्रधानम्। तत्तु अनुक्तमेव। अतः उक्तार्थत्वाभावात् अस्य न्यायस्य अत्र प्रसक्तिः नास्ति। तस्मात् कृतः कटः इत्यत्र द्वितीयावारणाय अनभिहिताधिकारः अपेक्षितः।

**द्वितीययुक्तिखण्डनम्-** परत्वात् प्रथमा इत्यपि न। अनभिहिताधिकाराभावे यद्यपि क्रियते कटः इत्यत्र प्रथमाद्वितीययोः प्राप्तयोः परत्वात् प्रथमा भवतु इति स्वीकर्तुं शक्यते तथापि कर्तव्यः कटः इत्यत्र प्रथमाद्वितीययोः अपि परत्वात् “कर्तृकर्मणोः कृति”[12] इति कृद्योगलक्षणा षष्ठी दुर्वारा स्यात्। अनभिहिताधिकारसत्त्वे उक्ते कर्मणि षष्ठी वार्यते।

**शङ्का-** ननु “कृत्यानां कर्तरि वा”[13] इति योगः विभज्यते। कृत्यानाम् इति एकः योगः, कर्तरि वा इति अपरः योगः। कृत्यानाम् इति विभक्तयोगस्य अर्थः भवति- कृत्यानां प्रयोगे उभयप्राप्तौ षष्ठी न इति। यथा नेतव्याः व्रजं गावः कृष्णेन इति। एवमेव कर्तव्यः कटः इत्यत्रापि कृत्यानाम् इति विभक्तयोगेन षष्ठी निषिध्यते। षष्ठ्याः निषेधे परत्वात् प्रथमा एव भवति। अतः अनभिहिताधिकारः नापेक्षते।

**समाधानम्-** अनभिहिताधिकाराभावे सति कृत्यप्रत्ययप्रयोगे सर्वत्रैव “उभयप्राप्तौ कर्मणि”[14] इत्यस्य विषयः स्यात्। यतो हि अकर्मकधातूनामपि देशकालादि कर्म सम्भवति, तदाश्रित्य कृत्यप्रयोगे सर्वदैव उभयप्राप्तौ कर्मणि इति कर्मणि एव षष्ठी स्यात्, कुत्रापि कर्तरि षष्ठी न स्यात्। तेन “कर्तृकर्मणोः कृति”[15] इति कर्तृग्रहणं व्यर्थं भवति। अतः अनभिहिताधिकारः आवश्यकः। सूत्रसत्त्वे कृत्यानां प्रयोगे कर्मणः उक्तत्वात् कर्तरि षष्ठी चरितार्था भवति।

किञ्च “आत्ममाने खश्च”[16] इति सूत्रभाष्ये भाष्यकारः वदति उभयप्रयोगरूप-उभयप्राप्तिः आवश्यकः। तदा एव कृत्यानाम् इति विभक्तसूत्रेण षष्ठीनिषेधः सम्भवति। कर्तव्यः कटः इत्यत्र कर्तुः अप्रयोगात् षष्ठीनिषेधः न भवति। तेन परत्वात् प्राप्तायाः षष्ठ्याः निवारणार्थम् अनभिहिताधिकारः अपेक्षते।

ननु यदि षष्ठीनिषेधार्थम् उभयप्रयोगरूप-उभयप्राप्तिः अपेक्षते तर्हि आक्रष्टव्या ग्रामं शाखा इत्यत्र कथं षष्ठीनिषेधः इति चेन्न, तत्र देवदत्तेन इत्यादिकर्तृपदम् अध्याहार्यम्।

एवञ्च संख्या विभक्त्यर्थः इति पक्षे सूत्रस्यास्य सार्थक्यम्, कारकं विभक्त्यर्थः इति पक्षे तु सूत्रमिदं प्रत्याख्यातम्।

**कारकं विभक्त्यर्थः-** कारकं विभक्त्यर्थः नाम यत्र विभक्तेः कारकरूपः अर्थः प्राधान्येन उच्यते। अस्मिन् पक्षे कर्मादि भवति विशेष्यम्, एकत्वादिसंख्या भवति विशेषणम्, तेन एकत्वविशिष्टे कर्मणि इत्यर्थः आयाति। अनभिहिते इति तु कर्मणि इत्यस्यैव विशेषणम्। तेन अर्थः भवति एकत्वविशिष्टे अनुक्ते कर्मणि द्वितीयैकवचनम्, द्वित्वविशिष्टे अनुक्ते कर्मणि द्वितीयाद्विवचनम्, बहुत्वविशिष्टे अनुक्ते कर्मणि द्वितीयाबहुवचनं भवति इति।

तेन कृतः कटः इत्यत्र क्तप्रत्ययेन कर्मणः उक्तत्वात् उक्तार्थानाम् अप्रयोगः इति न्यायेन पुनः द्वितीयायाः प्राप्तिर्न भवति। तस्माद् उक्तार्थानाम् अप्रयोगः इति न्यायेनैव द्वितीयादिनिषेधे सिद्धे कारकं विभक्त्यर्थः इति पक्षे अनभिहिताधिकारः प्रत्याख्यातः भाष्ये इति शम्।

---

[12] अष्टाध्यायी २/३/६५
[13] अष्टाध्यायी २/३/७१
[14] अष्टाध्यायी २/३/६६
[15] अष्टाध्यायी २/३/७१
[16] अष्टाध्यायी ३/२/८३


©Indira Gandhi National Open University

## आश्रितग्रन्थसूची


1. पाणिनिः; अष्टाध्यायी; पाण्डेयः, गोपालदत्तः (सम्पा.); वाराणसी; चौखम्बा सुरभारती प्रकाशन; २०११
2. भट्टोजिदीक्षितः; प्रौढमनोरमा (रत्नप्रकाशिका-भावप्रकाश-टीकासहिता); मिश्रः, भैरवः; पायगुण्डः, वैद्यनाथः (टीकाकारौ); वाराणसी; चौखम्बा संस्कृत संस्थान; २००३
3. भट्टोजिदीक्षितः; प्रौढमनोरमा (सशब्दरत्न-अनन्या-हिन्दीव्याख्योपेता); पाण्डेयः, रमाकान्तः (व्याख्याकारः); वाराणसी; चौखम्बा विद्याभवन; २००७
4. वामनः, जयादित्यः; काशिका [न्यास-पदमञ्जरी-भावबोधिनीसहिता] (द्वितीयो भागः); त्रिपाठी, जयशङ्करः; मालवीयः, सुधाकरः (सम्पा.); वाराणसी; तारा बुक एजेन्सी। १९८६
5. भट्टोजिदीक्षितः; वैयाकरणसिद्धान्तकौमुदी; शर्मा, गिरिधरः; शर्मा, परमेश्वरानन्दः (सम्पादकौ); दिल्ली; मोतिलाल वनारसीदास इंटरनेशनल; २०२१
6. पतञ्जलिः; व्याकरणमहाभाष्यम् (ज्योत्स्ना समुद्भासितम्); तिवारी; हरिणारायणः (टीकाकारः); वाराणसी; चौखम्बा विद्याभवन; २००९
7. पतञ्जलिः; व्याकरणमहाभाष्यम् [प्रदीपोद्योतोपेतम्] (प्रथमः खण्डः); शास्त्री, भार्गवः (सम्पा.); देहली; चौखम्बासंस्कृतप्रतिष्ठान। १९८७



©Indira Gandhi National Open University